S.V. Apte, English-Sanskrit Dictionary -- 3rd ed. Pune 1920



डं, पट्टः. **-ped,** *a.* अप-,हृत, अपनीत. **2** विवस्त्र, विवस्त्रीकृत, नग्नीकृत; हृतवस्त्र-वेश; 's. of one's all' हृतसर्वस्व.

**Stripe,** *s.* रे( ले )खा. **2** दीर्घखंडः. **3** कशाघातः-प्रहारः. **-***v. t.* रेखाभिः चित्रयति (D.) or अंक् 10. **2** कशया तड् 10 or प्रहृ 1 P.

**Stripling** *s.* शिशुः, अर्भकः, डिंभः, बालः, किशोरः.

**Strive,** *v. i.* प्र-,यत् 1 A, घट् 1 A, उद्यम् 1 A, चेष्ट् 1 A, व्यव-सो 4 P, प्रवृत् 1 A. **2** स्पर्ध् 1 A. **3** (Against) विवद् 1 A, विरुध् 7 U, कलहं कृ 8 U; *See* **Contend.**

**Stroke,** *s. See* under **Strike.**

**Stroll,** *v. i.* (आलस्येन) विचर् 1 P, परिक्रम् 1 U, 4 P, विहृ 1 P, परिभ्रम् 1, 4 P. **-***s.* परिक्रमः-मणं, विहारः, परि-,भ्रमणं, यथेष्टचारः. **-er,** *s.* पथिकः, यथेष्टविहारिन् *m.*

**Strong,** *a.* बलिन्, बलवत्, सबल, वीर्यवत्, शक्तिमत्, समर्थ, ऊर्जस्वल, ओजस्विन्, प्रबल, ऊर्जित; 's.-minded' मनस्विन्, धीरप्रकृति. **2** क्षम, दक्ष, कुशल. **3** दृढ, स्थिर (resolution); उग्र (smell). **4** तीव्र, तीक्ष्ण, चंड, प्रखर, अति pr. **5** गाढ, उत्कट, प्रबल; *See* **Intense.** **6** वीर्यवत्, प्रतापवत्, गुणावह, गुणकारिन् (medicine): 'to grow s.' प्रबलीभू, मुर्च्छ् 1 P; '10000 s.' अयुतसंख्याक; 's.-bodied,' 's.-built' उपचितगात्र, मांसल, दृढांग, दृढावयव; 's.-hold' दुर्गं, कोटः. **-ly,** *adv.* बलवत्, दृढं, गाढं, परमं, उग्रं, उत्कटं, &c. **-Strength,** *s.* बलं, वीर्यं, शक्ति *f.*, सामर्थ्यं, तेजस् *n.*, प्रभावः, ओजस् *n.*, ऊर्जः, सत्त्वं; वि-पराक्रमः; क्षमता, बलवत्ता, प्राबल्यं, विभवः; 'the s. of mind' धीशक्तिः, बुद्धि-प्रभावः, मतिविभवः; 'what is the s. of the enemy' कियत्संख्यकाः शत्रवः; 'on the s. of' अवलंब्य. **-en,** *v. t.* प्रबलीकृ 8 U, बलं दा 3 U or वृध् c. **2** दृढीकृ, द्रढयति (D.): *See* **Confirm, Establish;** निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति (U. 2) 's. s the belief that it is the same'; 'Sringāra s. ed by Karuna' करुणानुप्राणितः शृंगाररसः **-***v. i.* प्रबलीभू 1 P, प्र-उप-चि-pass.: वि-प्र-वृध् 1 A; प्ररुह् 1 P. **-ing,** *a.* बलवर्धन (नी *f.*), बलप्रद.

**Structure,** *s.* निर्माणं, संस्थानं, विधानं, रचनं-ना. **2** आकारः, रूपं. **3** मंदिरं, भवनं.

**Struggle,** *v. i.* प्रयत् 1 A. प्रयासं-यत्नं-कृ 8 U, चेष्ट् 1 A; शार्दूलः पशुमिव हन्मि चेष्टमानं (S. 6) 'an animal s.-ing, while being killed' &c. **2** युध् 4 A, संयत्; *See* **Fight.** **-ing,** *s.* प्रयासः, प्रयत्नः, वि-चेष्टा-चेष्टितं, अतियत्नः; मुक्तप्रयत्नं मां सलिलबिंदूनपाययत् (Ka. 38) 'me who had ceased s.' &c. **2** युद्धं, कलहः, विवादः, द्वंद्वं.

**Struma,** *s.* विस्फोटः-टकः.

**Strumpet,** *s. See* **Prostitute.**

**Strut,** *v. i.* साटोपं-उद्धतं-धीरोद्धतं-परिक्रम् 1 U, 4 P, सगर्वं चल् 1 P. **-***s.* साटोप-उद्धत-सगर्व-गति *f.* **-ting,** *a.* सगर्वगति, साटोपगामिन्.

**Stubble,** *s.* नालः-ली, लूनशस्यनालः.

**Stubborn,** *a.* दुर्दांत, दुर्दम, प्रतिनिविष्ट, अवश्य, अविनेय, प्रतीप; *See* **Obstinate.**

**Stucco,** *s.* सुधा, चूर्णलेपः. **-***v. t.* सुधया लिप् 6 P. **-ed.** *a.* सुधालिप्त.

**Stud,** *s.* गंडः; (of horses) अश्वाः, आश्वं, अश्वीयं, वाडवं; (place) अश्वशाला, मंदुरा. **-***v. t.* उत्-,खच् 10 (खचयति), प्रतिबंध् 9 P, प्रतिवप् 1 P, अनुव्यध् 4 P: 'sky s. ed with stars' तारकितं नभः; 's. ed with gems' रत्नखचित, रत्नानुविद्ध-प्रत्युप्त &c.

**Study,** *v. t.* अधि-इ 2 A, अधिगम् 1 P, (acquire by s.); शिक्ष् 1 A; पठ् 1 P; आवृत् c., अभ्यस् 4 U. **2** ध्यै 1 P, चिंत् 10, कल्प् 10; प्रयत् 1 A, विमृश् 6 P. **-***s.* अध्ययनं, अभ्यासः अभ्यसनं, शिक्षणं, पठनं, पाठः, अधिगमः-मनं; 's. of the Vedas' वेदाध्ययनं, उपाकरणं; 'close s.' अविरताभ्यासः, अनु-परि-शीलनं; 'desultory s.' चंक्रमणं. **2** अध्ययनशाला-आगारं, ग्रंथकुटी. **3** पाठः, अध्ययनविषयः. **4** चिंतनं, कल्पना, विचारः. **-ent,** *s.* अध्येतृ *m.*, छात्रः, शिष्यः, अधीयानः, विद्यार्थिन् *m*; 'a religious s.' ब्रह्मचारी, व्रती, लिंगी. **-ied,** *a.*: पूर्वपठित, सुनिश्चित, पूर्वनिर्णीत, चिंतित-निर्णीत-पूर्व, कामतः कृत. **-ious,** *a.* अध्ययनपरायण-तत्पर-शील-आसक्त, विद्याप्रसित-अभिनिविष्ट. **2** उत्सुक, व्यवसायपर, अध्यवसायिन्; 'of s. habits' व्यवसायशील. **-iously,** *adv.* विद्याभ्यासंगेन; संकल्प-निर्णय-पूर्वं, कामतः. **-iousness,** *s.* अध्ययन-विद्या-आसक्ति *f.*-अभिनिवेशः, विद्याभ्यासंगः.

**Stuff,** *s.* वस्तु *n.*, द्रव्यं, प्रकृति *f.*, पदार्थः. **2** पटः, वस्त्रं, वसनं; *See* **Cloth.** **3** गृहोपस्करः, गृहसामग्री-द्रव्याणि-भांडानि. **4** तुच्छ-कुत्सित-द्रव्यं. **5** अनर्थकप्रलापः. **-***v. t.* अत्यंतं पूर् 10, अतिशयेन तृप् c. **2** **Crowd, Cram.** q. v.; 's. ed with cotton' कार्पासपूरित. **-***v. i.* आतृप्ति पृ pass. **-ing,** *s.* पूरणं &c.

**Stuffy,** *a.* निर्वात.

**Stultify,** *v. t.* मूढीकृ 8 U, मूर्खवत् आचर् c.; (oneself) मूर्खवत् आचर् 1 P.

**Stumble,** *v. i.* प्र-,स्खल् 1 P, विषमीभू, (मार्गे पदानि खलु ते विषमीभवंति S. 4)

Institute of Indology & Tamil Studies Cologne University Germany 9/1/2007